"नैव ह्रस्वा न महती न कृष्णा नापि रोहिणी।
नीलकुञ्चितकेशी च तथा दीर्घाप्यहं त्वया॥")

रोहिणीपतिः, पुं, (रोहिण्याः पतिः।) चन्द्रः। इति हेमचन्द्रः। २। १८॥ (यथा, देवीभागवते। १। ११। १८।
"इत्येवं भाषमाणं तमुवाच रोहिणीपतिः।
गुरुं क्रोधसमायुक्तं कान्ताविरहदुःखितम्॥"
वसुदेवः। वृषभश्च॥)

रोहिणीरमणः, पुं, (रोहिण्या रमणः।) वृषभः। इति राजनिर्घण्टः॥ वसुदेवश्च॥ (चन्द्रः। यथा, गीतगोविन्दे। ३। १०।
"वर्णितं जयदेवकेन हरेरिदं प्रवणेन।
केन्दुबिल्वसमुद्रसम्भवरोहिणीरमणेन॥")

रोहिणीवल्लभः, पुं, (रोहिण्या वल्लभः।) चन्द्रः। इति हलायुधः॥ वसुदेवश्च॥

रोहिणीशः, पुं, (रोहिण्या ईशः।) चन्द्रः। इति हेमचन्द्रः॥ (यथा, माघे। ३। ६०।
"यां रेवतीजानिरियेश हातुं
न रौहिणेयो न च रोहिणीशः॥")
वसुदेवश्च॥

रोहिण्यष्टमी, स्त्री, (रोहिणीयुक्ता अष्टमी।) रोहिणीनक्षत्रयुक्तभाद्रकृष्णाष्टमी। यथा,—
"कृष्णाष्टम्याञ्च रोहिण्यामर्द्धरात्रेऽर्चनं हरेः।
कार्य्या विद्धापि सप्तम्या हन्ति पापं त्रिजन्मजम्॥
उपोषितोऽर्च्चयेन्मन्त्रैस्तिथिभान्ते च पारणम्॥
योगाय योगपतये योगेश्वराय योगसम्भवाय गोविन्दाय नमो नमः॥ ध्यानमन्त्रः। यज्ञाय यज्ञेश्वराय यज्ञपतये यज्ञसम्भवाय गोविन्दाय नमो नमः॥ अर्च्चनस्य। विश्वाय विश्वेश्वराय विश्वपतये विश्वसम्भवाय गोविन्दाय नमो नमः॥ शयनस्य। सर्व्वाय सर्व्वेश्वराय सर्व्वपतये सर्व्वसम्भवाय गोविन्दाय नमो नमः॥ पारणस्य।
स्थण्डिले पूजयेद्देवं सचन्द्रां रोहिणीन्तथा।
शङ्खे तोयं समादाय सपुष्पफलचन्दनम्।
जानुभ्यामवनीं गत्वा चन्द्रायार्घ्यं निवेदयेत्॥
क्षीरोदार्णवसम्भूत अत्रिनेत्रसमुद्भव।
गृहाणार्घ्यं शशाङ्केदं रोहिण्या सहितो मम॥
श्रियै वसुदेवाय बलदेवाय नन्दाय यशोदायै।
अनघं वामनं शौरिं वैकुण्ठं पुरुषोत्तमम्।
वासुदेवं हृषीकेशं नृसिंहं दैत्यसूदनम्॥
वाराहं पुण्डरीकाक्षं श्रीकान्तमजमव्ययम्।
दामोदरं पद्मनाभं केशवं गरुड़ध्वजम्॥
गोविन्दमच्युतं देवमनन्तमपराजितम्।
अधोक्षजं जगद्बीजं सर्गस्थित्यन्तकारकम्॥
अनादिनिधनं विष्णुं त्रिलोकेशं त्रिविक्रमम्।
नारायणञ्चतुर्बाहुं शङ्खचक्रगदाधरम्॥
पीताम्बरधरं दिव्यं वनमालाविभूषितम्।
श्रीवत्साङ्कं जगद्धाम श्रीपतिं श्रीधरं हरिम्॥
यं देवं देवकी देवी वसुदेवादजीजनत्।
भौमस्य ब्रह्मणो गुप्त्यै तस्मै ब्रह्मात्मने नमः।
नामान्येतानि संकीर्त्य गत्यर्थं प्रार्थयेत् पुनः॥
त्राहि मां सर्व्वपापघ्न दुःखशोकार्णवात् प्रभो।
देवकीनन्दन श्रीश हरे संसारसागरात्॥
दुर्वृत्तांस्त्रायसे विष्णो ये स्मरन्ति सकृत् सकृत्।
सोऽहं देवातिदुर्वृत्तस्त्राहि मां शोकसागरात्॥
पुष्कराक्ष निमग्नोऽहं महत्यज्ञानसागरे।
त्राहि मां देवदेवेश त्वामृतेऽन्यो न रक्षिता॥
स्वजन्म वासुदेवाय गोब्राह्मणहिताय च।
जगद्धिताय कृष्णाय गोविन्दाय नमो नमः॥
शान्तिरस्तु शिवञ्चास्तु धनर्द्धिख्यातिराज्यभाक्॥"
इति गारुड़े १३२ अध्यायः॥

रोहित्, पुं, (रोहतीति। रुह+"हृरुहियुषिभ्य इतिः।" उणा० १। ९९। इति इतिः।) सूर्य्यः। इति मेदिनी। टे, १४७॥ वर्णभेदः। मत्स्यभेदः। इति संक्षिप्तसारोणादिवृत्तिः॥ (ऋष्यमृगः। यथा, वाजसनेयसंहितायाम्। "२४। ३०॥ "मनुष्यराजाय मर्कटः शार्द्दूलाय रोहित्।" "एको रोहित् ऋष्यः शार्द्दूलाय।" इति तद्भाष्ये महीधरः॥ रोहितवर्णविशिष्टे, त्रि। (यथा, ऋग्वेदे। १। १००। १६।
"रोहित् श्यावा सुमदंशुर्ललामीः।"
"रोहित् रोहितवर्णा श्यावा श्यामवर्णा।" इति तद्भाष्ये सायणः॥)

रोहित्, स्त्री, (रुह+"हृरुहियुषिभ्य इतिः।" उणा० १। ९९। इति इतिः।) मृगी। ("ऋष्यस्य मृगस्य मृगी रोहिदुच्यते। तथाच महिम्नः स्तवे। गतं रोहिद्भूतां रिरमयिषुमृष्यस्य वपुषा।" इत्युज्ज्वलः। १। ९९॥) लताभेदः। इति मेदिनी। टे, १४७॥ (वड़वा। यथा, ऋग्वेदे। १। १४। १२।
"युक्ष्वा ह्यरुषी रथे हरितो देव रोहितः॥"
"हे देवाग्ने रोहितः रोहिच्छब्दाभिधेयास्त्वदीया वड़वाः रथे युक्ष्व युज योजय।" इति तद्भाष्ये सायणः॥*॥ रोहन्त्याभिर्बीजानि तत्स्थलेन हि बीजानि प्ररोहन्तीति तथात्वम्। नदी। इति निघण्टुः। १। १३। १८॥ निगमेषु बहुवचनान्तत्वेन प्रायशः श्रवणात् बहुवचनान्तत्वम्॥)

रोहितं, क्ली, (रुह+"रुहे रश्च लो वा।" उणा० ३। ९४। इति इतन्।) कुङ्कुमम्। रक्तम्। ऋजुशक्रशरासनम्। इति मेदिनी। ते, १४५॥ (यथा, मनुः। १। ३८।
"विद्युतोऽशनिमेघांश्च रोहितेन्द्रधनूंषि च।
उल्कानिर्घातकेतूंश्च ज्योतींष्युच्चावचानि च॥")

रोहितः, पुं, (रोहतीति। रुह+"रुहे रश्च लो वा।" उणा० ३। ९४। इति इतन्।) मीनविशेषः। (यथाह कश्चित्।
"ईलीशो जितपीयूषो वाचा वाचामगोचरः।
रोहितो नो हितः प्रोक्तो मद्गुरो मद्गुरोः प्रियः॥")
रोहितमत्स्यस्य लक्षणं गुणाश्च यथा,—
"कृष्णः शल्की श्वेतकुक्षिस्तु मत्स्यो
यः श्रेष्ठोऽसौ लोहितो वृत्तवक्त्रः।
कोष्णं बल्यं रोहितस्यापि मांसं
वातं हन्ति स्निग्धमभ्राति वीर्य्यम्॥"
इति राजनिर्घण्टः॥
अपि च।
"रक्तोदरो रक्तमुखो रक्ताक्षो रक्तपक्षतिः।
शष्पपक्षो भषश्रेष्ठो रोहितः कथितो बुधैः॥
रोहितः सर्व्वमत्स्यानां वरो वृष्योऽर्द्दितार्त्तिजित्।
कषायानुरसः स्वादुर्व्वातघ्नो नातिपित्तकृत्॥
ऊर्द्ध्वजत्रुगतान् रोगान् हन्याद्रोहितमुण्डकम्॥"
इति भावप्रकाशः॥
(तथाच।
"वातघ्नो नहि पित्तलश्चलकरः स्याद्रोहितः सर्व्वदा॥"
इति हारीते प्रथमस्थाने एकादशेऽध्याये॥
"शैवलाहारभोजित्वात् स्वप्नस्य च विवर्ज्जनात्।
रोहितो दीपनीयश्च लघुपाको महाबलः॥"
इति चरके सूत्रस्थाने सप्तविंशेऽध्याये॥
"कषायानुरसस्तेषां शष्पशैवालभोजनः।
रोहितो मारुतहरो नात्यर्थं पित्तकोपनः॥"
इति सुश्रुते सूत्रस्थाने ४६ अध्याये॥
स्वनामख्यातो हरिश्चन्द्रस्य नृपतेः पुत्रः। यथा देवीभागवते। ७। १५। १५॥
"राजा पुत्रमुखं दृष्ट्वा मुदमाप महत्तरम्।
नामास्य रोहितश्चेति चकार विधिपूर्व्वकम्॥"
अस्य विवरणन्तु तत्रैव द्रष्टव्यम्॥) मृगभेदः। रोहितकवृक्षः। इति मेदिनी। ते, १४६॥ (रोहीतोऽपि पाठः। रोहीतकशब्ददर्शनात्॥ यथा, सुश्रुते। ६। १७।
"पलाशरोहीतमधूकजा रसाः
क्षौद्रेण युक्ता मदिराश्वमिश्रिताः॥"
अग्निघोटकः। इति निघण्टुः। १। १५॥
"रोहन्ति आरोहन्ति रथं वहन्त्यादित्यमिति रोहितः।" इति तत्र देवराजयज्वा॥ यथा, ऋग्वेदे। १। ९४। १०।
"यद्युक्था अरुषा रोहिता रथे॥"
"रोहिता लोहितवर्णौ रोहित इत्यग्नेरश्वस्याख्या रोहितोऽग्नेरितिदर्शनात् रोहितेनत्वाग्निर्देवतां गमयत्विति मन्त्रवर्णाच्च।" इति तद्भाष्ये सायणः॥)
रक्तवर्णः। रक्तवर्णविशिष्टे, त्रि। इत्यमरः॥ (यथा, वाजसनेयसंहितायाम्। १६। १९।
"नमो रोहिताय स्थपतये वृक्षाणां पतये नमो नमः॥")

रोहितकः, पुं, (रोहित एव। स्वार्थे कन्।) वृक्षविशेषः। रोहड़ा इति भाषा। तत्पर्य्यायः। रोही २ प्लीहशत्रुः ३ दाड़िमपुष्पकः ४। इत्यमरः॥ रोहीतकः ५ रोहितः ६ रोहिणः ७ कुशाल्मलिः ८ दाड़िमपुष्पः ९ सदाप्रसूनः १० कूटशाल्मलिः ११ विरोचनः १२ शाल्मलिकः १३। अस्य गुणाः। कटुत्वम्। स्निग्धत्वम्। कषायत्वम्। सुशीतलत्वम्। क्रिमिदोष-